॥ શ્રી ॥

અથ શ્રી ત્રિવિક્રમપંડિતાચાર્યસુત શ્રી નારાયણપંડિતાચાર્યવિરચિતઃ

॥ શ્રી મધ્વવિજયઃ ॥

૨. દ્વિતીયઃ સર્ગઃ

વિજ્ઞાનભાનુમતિ કાલબલેન લીને
દુર્ભાષ્યસંતમસસંતતિતો જનેઽંધે ।
માર્ગાત સતાં સ્ખલતિ ખિન્ન હૃદો મુકુંદં
દેવાશ્ચતુર્મુખમુખાઃ શરણં પ્રજગ્મુઃ ॥ ૨.૧ ॥
નાથઃ કલૌ ત્રિયુગહૂતિરનુદ્બુભૂષુઃ
બ્રહ્માણમપ્યનવતારમનાદિદિક્ષુઃ ।
સર્વજ્ઞમન્યમનવેક્ષ્ય સ કાર્યવીર્યં
સ્મેરાનનો ભુવનજીવનમાબભાષે ॥ ૨.૨ ॥
વેદાંતમાર્ગપરિમાર્ગણદીનદૂનાઃ
દૈવીઃ પ્રજા વિશરણાઃ કરુણાપદં નઃ ।
આનંદયેઃ સુમુખ ભૂષિતભૂમિભાગો
રૂપાંતરેણ મમ સદ્ગુણનિર્ણયેન ॥ ૨.૩ ॥
આદેશમૌલિમણિમુજ્જ્વલવર્ણમેનં
બદ્ધાંજલિર્મરુદનર્ઘમધત્ત મૂર્ધ્ના ॥
હારાવળીમિવ હૃદા વિબુધેંદ્રયાચ્ઞાં
બિભ્રન્નિજાનનુજિઘૃક્ષુરવાતિતીર્ષત ॥ ૨.૪ ॥
કાલઃ સ એવ સમવર્તત નામ યાવત
ચિંતાકુલં વિવિધસાધુકુલં બભૂવ ।
વેદાંતસંતતકૃતાંતરસં ન વિદ્મઃ

શ્રેયો લભેમહિ કથં નુ વયં બતેતિ ॥ ૨.૫ ॥
તત્પ્રીતયે રજતપીઠપુરાધિવાસી દેવો
વિવેશ પુરુષં શુભસૂચનાય ।
પ્રાપ્તે મહાય મહિતાય મહાજનૌઘે
કોલાહલેન સકુતૂહલિનિ પ્રવૃત્તે ॥ ૨.૬ ॥
આવિષ્ટવાનકુશલં પુરુષં પ્રકૃત્યા
પ્રત્યાયયન્નિહ જનાન નિતરામનૃત્યત ।
ઉત્તુંગકેતુશિખરે સ કૃતાંગહારો
રંગાંતરે નટ ઈવાખિલવિસ્મયાત્મા ॥ ૨.૭ ॥
આભાષ્ય સોઽત્ર જનતાં શપથાનુવિદ્ધં
ઉચ્ચૈરિદં વચનમુદ્ધૃતદોર્ભભાષે ।
ઉત્પત્સ્યતે જગતિ વિશ્વજનીનવૃત્તિઃ
વિશ્વજ્ઞ એવ ભગવાનચિરાદિહેતિ ॥ ૨.૮ ॥

સદ્વીપવારિનિધિસપ્તકભૂતધાત્ર્યા
મધ્યેઽપિ કર્મભુવિ ભારત નામ ખંડે ।
કાલે કલૌ સુવિમલાન્વયલબ્ધજન્મા
સન્મધ્યગેહકુલમૌલિમણિર્દ્વિજોઽભૂત ॥ ૨.૯ ॥
વેદાદ્રિસદ્રજયપીઠપુરેશ્વરાભ્યાં
ગ્રામો વિભૂષિતતરઃ શિવરૂપ્યનામા ।
હેમાદ્રિરાજવિભુરાજદિળાવૃતાભઃ તસ્યા-
ભવદ ગુરુગુણઃ ખલુ મૂલભૂમિઃ ॥ ૨.૧૦ ॥
રામાધિવેશિતહરિસ્વસૃમૌલિમાલા-

રાજદ્રિમાનગિરિશોભિતમધ્યુવાસ ।
ક્ષેત્રં સ પાજકપદં ત્રિ કુલૈકકેતુઃ
કં ચદ દધાતિ સતતં ખલુ વિશ્વપાજાત ॥ ૨.૧૧ ॥
અર્થં કમપ્યનવમં પુરુષાર્થ હેતું
પુંસાં પ્રદાતુમુચિતામુચિતસ્વરૂપામ ।
કન્યાં સુવર્ણલસિતામિવ વેદવિદ્યાં
જગ્રાહ વિપ્રવૃષભ પ્રતિપાદિતાં સઃ ॥ ૨.૧૨ ॥
રેમેડચ્છયોપનિષદેવ મહાવિવેકો
ભકત્યેવ શુદ્ધકરણઃ પરમશ્રિતાડલમ ।
મિથ્યાભિમાનરહિતઃ પરયેવ મુકત્યા
સ્વાનંદસંતતિકૃતા સ તયા દ્વિજેંદ્રઃ ॥ ૨.૧૩ ॥
તસ્ય પ્રભોશ્ચરણયોઃ કુલદેવતાયાઃ
ભકિતં બબંધ નિજધર્મરતઃ સ ધીરઃ ।
વિજ્ઞાતભારતપુરાણમહારહસ્યં
યં ભટ્ટ ઈત્યભિવદંતિ જના વિનીતમ ॥ ૨.૧૪ ॥
ગોવિંદસુંદરકથાસુધયા સ નૃણાં
આનંદયન્ન કિલ કેવલમિંદ્રિયાણિ ।
કિંતુ પ્રભો રજતપીઠપુરે પદાબ્જં
શ્રીવલ્લભસ્ય ભજતામપિ દૈવતાનામ ॥ ૨.૧૫ ॥
ઈત્થં હરેર્ગુણકથાસુધયા સુતૃપ્તો
નૈર્ગુણ્યવાદિષુ જનેષ્વપિ સાગ્રહેષુ ।
તત્વે સ કાલચલધીરતિસંશયાલુઃ ધીમાન
ધિયા શ્રવણશોધિતયા પ્રદધ્યૌ ॥ ૨.૧૬ ॥

ત્રાતા ચ એવ નરકાત સ હિ પુત્રનામ
મુખ્યાવનં ન સુલભં પુરુષાદપૂર્ણાત ।
તસ્માત સમસ્તવિદપત્યમવદ્યહીનં
વિદ્યાકરાકૃતિ લભેમહિ કૈરુપાયૈઃ ॥ ૨.૧૭ ॥
પૂર્વેઽપિ કર્દમપરાશરપાંડુમુખ્યાઃ
યત્સેવયા ગુણગણાઢ્યમપત્યમાપુઃ ।
તં પૂર્ણષડ્ગુણતનું કરુણામૃતાબ્ધિં
નારાયણં કુલપતિં શરણં વ્રજેમ ॥ ૨.૧૮ ॥
ઈત્થં વિચિંત્ય સ વિચિંત્યમનન્ય બંધુઃ
પ્રેષ્ઠપ્રદં રજતપીઠપુરાધિવાસમ ।
ભક્ત્યા ભવાબ્ધિભયભંગદયા શુભાત્મા
ભેજે ભુજંગશયનં દ્વિષડબ્દકાલમ ॥ ૨.૧૯ ॥
પત્ન્યા સમં ભગવતઃ સ ભજન પદાબ્જં
ભોગાન લઘૂનપિ પુનર્લઘયાંચકાર ।
દાંતં સ્વયં ચ હૃદયં દમયાંચકાર
સ્વચ્છં ચ દેહમધિકં વિમલીચકાર ॥ ૨.૨૦ ॥
તીવ્રૈઃ પયોવ્રતમુખૈર્વિવિધ વ્રતાગ્ર્યૈઃ
જાયાપતી ગુણગણાર્ણવપુત્રકામૌ ।
સંપૂર્ણપૂરુષમતોષયતાં નિતાંતં
દેવેરિતાવિવ પુરાઽદિતિકશ્યપૌ તૌ ॥ ૨.૨૧ ॥
નાથસ્ય ભૂરિકરુણાસુધયાઽભિષિક્તૌ

શ્રીશ્રીધરપ્રતતિશારશરીરચષ્ટી ।
ભૂરિવ્રતપ્રભવદ્દિવ્યસુકાંતિમંતૌ
તૌ દેહશુદ્ધિમતિમાત્રમથાલભેતામ ॥ ૨.૨૨ ॥
કાંતાદૃતૌ સમુચિતેઽથ બભાર ગર્ભં
સા ભૂસુરેંદ્રદુહિતા જગતાં હિતાય ।
અચ્છાંબરેવ રજની પરિપૂરિતાશા
ભાવિન્યપાસ્તતમસં વિધુમાદ્યપક્ષાત ॥ ૨.૨૩ ॥
તં પૂર્વપક્ષસિતબિંબમિવ પ્રવૃદ્ધં
યાવદ દ્વિજેંદ્રવનિતા સુષુવેઽત્ર તાવત ।
અંશેન વાયુરવતીર્ય સ રૂપ્યપીઠે
વિષ્ણું પ્રણમ્ય ભવનં પ્રયયૌ તદીયમ ॥ ૨.૨૪ ॥

સંપૂર્ણલક્ષણચણં નવરાજમાન
દ્વારાંતરં પરમસુંદરમંદિરં તત ।
રાજેવ સત્પુરવરં ભુવનાધિરાજો
નિષ્કાસયન પરમસૌ ભગવાન વિવેશ ॥ ૨.૨૫ ॥
સંતુષ્યતાં સકલસન્નિકરૈરસદ્ભિઃ
ખિદ્યેત વાયુરયમાવિરભૂત પૃથિવ્યામ ।
આખ્યાનિતીવ સુરદુંદુભિમંદ્રનાદઃ
પ્રાશ્રાવિ કૌતુકવશૈરિહ માનુષૈશ્ચ ॥ ૨.૨૬ ॥
નાથં નિષેવ્ય ભવનાનતિદૂરમાપ્તઃ
પ્રાજ્ઞો મહપ્રકૃતદુંદુભિનાદપૂર્વાત ।

પુત્રોદ્ભવશ્રવણતો મહદાપ્ય સૌખ્યં
જ્ઞાનં પરોક્ષપદમપ્યમતેષ્ટહેતુમ ॥ ૨.૨૭ ॥
આવિશ્ય વેષ્મ નિજનંદનમિંદુવક્ત્રં
ભૂયોઽભિનંદ્ય સ મુકુંદદયાં પ્રવંદ્ય ।
જાતસ્ય તસ્ય ગુણજાતવહસ્ય જાત–
કર્માદિકર્મનિવહં વિદધે સુકર્મા ॥ ૨.૨૮ ॥
જ્ઞાનાર્થમેવ યદભૂદસુદેવ એષઃ
યદ વાસુદેવપદભક્તિરતઃ સદાઽસૌ ।
તદ વાસુદેવપદમન્વવદન સુરેંદ્રાઃ
તાતેન યન્નિગદિતં સુતનામકર્ત્રા ॥ ૨.૨૯ ॥
પાતું પયાંસિ શિશવે કિલ ગોપ્રદોઽસ્મૈ
પૂર્વાલયઃ સ્વસુતસૂનુતયા પ્રજાતઃ ।
નિર્વાણહેતુમલભિષ્ટ પરાત્મવિદ્યાં
દાનં ધ્રુવં ફલતિ પાત્રગુણાનુકૂલ્યાત ॥ ૨.૩૦ ॥
અત્રસ્તમેવ સતતં પરિફુલ્લચક્ષુઃ
કાંત્યા વિડંબિતનવેંદુ જગત્યનર્ઘમ ।
તત પુત્રરત્નમુપગૃહ્ય કદાચિદાપ્તઃ
સ્વસ્વામિને બુધ ઉપાયનમાર્પયત સઃ ॥ ૨.૩૧ ॥
નત્વા હરિં રજતપીઠપુરાલયં
તં બાલસ્ય સંપદમનાપદમર્થયિત્વા ।
સાકં સુતેન પરિવારજનાન્વિતોઽસૌ
પ્રાયાન્નિશીથસમયે નિજમેવ ધામ ॥ ૨.૩૨ ॥

દોષેચુષાં સમમનેન વનેऽતિભીમે
તત્ક્રીડિતગ્રહ ઈહૈકતમં તુતોદ ।
ઉદ્ભ્રાંતરકતમવલોક્ય તમભ્યધાયિ
કેનાપ્યહો ન શિશુતુત કથમેષ ઈત્થમ ॥ ૨.૩૩ ॥
આવિશ્ય પૂરુષમુવાચ મહાગ્રહોऽસૌ
અસ્મદ્વિહારસમયોપગતાન સમસ્તાન ।
યચ્છકિતગુપ્તિરહિતાનલમસ્મિ હંતું
લોકેશ્વરઃ સ બત બાલતમઃ કિલેતિ ॥ ૨.૩૪ ॥
સ્તન્યેન બાલમનુતોષ્ય મુહુઃ સ્વધામ્નો
માતા કદાચન યયૌ વિરહાસહાऽપિ ।
વિશ્વસ્ય વિશ્વપરિપાલકપાલનાય
કન્યાં નિજામનુગુણાં કિલ ભીરુરેષા ॥ ૨.૩૫ ॥
સા બાલકં પ્રરુદિતં પરિસાંત્વયંતી
મુગ્ધાક્ષરેણ વચસાऽનુનિનાય મુગ્ધા ।
મા તાત તાત સુમુખેતિ પુનઃ પ્રરોદીઃ
માતા તનોતિ રુચિતં ત્વરિતં તવેતિ ॥ ૨.૩૬ ॥
રોદે ક્રિયાસમભિહારત એવ વૃત્તે
પોતસ્ય માતરિ ચિરાદપિ નાऽગતાયામ ।
જગ્રાહ બાલમથ ચૈક્ષત માતૃમાર્ગં
સાऽપિ ક્રિયાસમભિહારત એવ બાલા ॥ ૨.૩૭ ॥
કર્તવ્યમૌઢ્યમભિપદ્ય નિરૂપ્ય સા તં
પ્રાભોજયત ખલુ કુલસ્થકુલં પ્રપક્વં ।

શીતં પયોઽપિ સતતં પરિપાચયંતી
યસ્યોષ્ણરોગમતિવેલમશંકતાંબા ॥ ૨.૩૮ ॥
નૂનં પિપાસુરતિરોદિતિ હંત બાલો
ધિઙ માં દયાવિરહિતાં પરકૃત્યસકતામ ।
ઈત્યાકુલા ગૃહમુપેત્ય તદા પ્રસન્નં
પૂર્ણોદરં સુતમવૈક્ષત વિપ્રપત્ની ॥ ૨.૩૯ ॥
પૃષ્ટ્વાઽવગમ્ય સકલં ચ તતઃ પ્રવૃત્તં
યૂનાં ચ દુસ્સહમિદં શિશુનોપભુકતમ ।
ઈત્થં વિચિંત્ય તનયાં બહુ ભત્સયંત્યા
ભીતં તયોત કુપિતં મનસાઽનુતપ્તમ ॥ ૨.૪૦ ॥

આરોગ્યશાલિનિ તદાઽપિ પુરેવ પુત્રે
વિસ્મેરતામુપજગામ જનન્યમુષ્ય ।
યસ્ય ત્રિલોકજનની જનની વિષેઽપિ
પીતે ન વિસ્મયમવાપ સમસ્તશકતેઃ ॥ ૨.૪૧ ॥
સ્તન્યં મુહુઃ કિલ દદૌ જનની ગૃહીત્વા
ક્ષેમાય તં કિલ દધજ્જનકો જજાપ ।
અન્યો જનોઽપિ કિલ લાળયતિ સ્મ કિંતુ
સર્વોઽપિ તન્મુખસુહાસરસાયનોત્કઃ ॥ ૨.૪૨ ॥
દેવાદિસદ્ભિરનુપાલિતયાઽઽદરેણ
દેવ્યાઽઽત્મનેવ વિલસત્પદયા નિતાંતમ ।
અવ્યકતયા પ્રથમતો વદનેઽસ્ય વાણ્યા

www.yogsigma.com

શાલીનચેવ ભુવનાર્ચિતચા વિજહે ॥ ૨.૪૩ ॥
પ્રાગ્રિંખણં સ્વચમથ સ્થિતિમેષ
ચક્રે પશ્ચાદ ગતિં પરિચચેન કિલ ક્રમેણ ।
વિશ્વસ્ય ચેષ્ટિતમહો ચદનુગ્રહેણ
સર્વં તદસ્ય પવનસ્ય વિડંબનં હિ ॥ ૨.૪૪ ॥
પુચ્છાંતમચ્છમવલંબ્ય કદાચિદેષ
પ્રાતર્વ્રજાદ વ્રજત એવ નિજર્ષભસ્ય ।
પ્રાચાત પ્રિયસ્ય સહસા સ્વજનૈરદૃષ્ટો
નાનાવનેષુ ચરતશ્ચરતસ્તૃણાનિ ॥ ૨.૪૫ ॥
ઉત્તુંગશૃંગલસિતસ્ય મહિષ્ઠમૂર્તેઃ
પાદાવૃતાવનિતળસ્ય સુરંધ્રકસ્ય ।
આશ્રિત્ય તસ્ય શુશુભેડવયવૈકદેશં
બાલો દિવાકર ઈવોદચપર્વતસ્ય ॥ ૨.૪૬ ॥
લીલાં કરોતિ નુ ગૃહાંતરગો નુ બાલઃ
કૂપાંતરે નુ પતિતઃ પ્રકૃતિસ્વતંત્રઃ ।
ઈત્થં વિચિંત્ય સ મુહુઃ સ્વજનો વિમૃગ્ય
હંતાનવેક્ષ્ય તનચં હૃદિ તાપમાપ ॥ ૨.૪૭ ॥
બાલસ્ય બાલપરિલંબનગોચરં તદ
વ્યશ્વસ્યતાપિ વચનં વનગોચરોક્તમ ।
ચત સાચમૈક્ષત જનઃ શિશુમાવ્રજંતમ
એકાબ્દકં વૃષભબાલકૃતાવલંબમ ॥ ૨.૪૮ ॥

www.yousigma.com

ચિંતામણીંદ્રમિવ ચિંતિતદં દરિદ્રો
વિજ્ઞાનમાર્ગમિવ વિષ્ણુપરં મુમુક્ષુઃ ।
નષ્ટં ચ નંદનમિતિ સ્વજનોઽસ્ય લબ્ધ્વા
નાથસ્ય તસ્ય તમનુગ્રહમેવ મેને ॥ ૨.૪૯ ॥
લીલાવસાનસમયે સહસા કદાચિદ
આર્યોઽમુનાઽભ્યવહૃતિં પ્રતિ ચોદ્યમાનઃ ।
રોદ્વૈષ નોઽસ્તિ ધનિકો વૃષવિક્રયીતિ
પ્રોવાચ નંદનમુખેંદુમવેક્ષ્ય મંદમ ॥ ૨.૫૦ ॥
લીલાકરેણ સ કરેણ સુકોમલેન
બીજાંતરાણિ કિલ કાનિચિદાશુ તસ્મૈ ।
સ્મિત્વાઽર્ભકોઽભિમતનિષ્કપદે ચદાઽદા-
દાદત્ત તાનિ ધનિકો બહુમાનપૂર્વમ ॥ ૨.૫૧ ॥
લબ્ધં સુતાદિતિ વદન દ્વિજપુંગવેન
કાલાંતરે નિજધને પ્રતિદિત્સિતેઽપિ ।
સાક્ષાદમાનવનવાકૃતિતઃ સ લેભે
બીજચ્છલેન પુરુષાર્થમહો વિશિષ્ટમ ॥ ૨.૫૨ ॥
વાસુદેવમિહ વાઽસુદેવતા સત્કલામભિનનંદ તં જનઃ ।
વાસુદેવમિતિ વાસુદેવસન્નામકં વિવિધલીલમર્ભકમ ॥ ૨.૫૩ ॥
ઈતિ વિહરતિ મહ્યાં વિષ્ણુદાસેઽપિ ગૂઢે
સમજનિ સુજનાનાં ચિત્તમાનંદપૂર્ણમ ।
ઉદયતિ ઘનમાલાલીનભાનૌ ચ ભાનૌ
નનુ જનનયનાબ્જૈર્લભ્યતેઽલં વિકાસઃ ॥ ૨.૫૪ ॥
॥ ઈતિ શ્રીમત્કવિકુલતિલક ત્રિવિક્રમપંડિતાચાર્યસુત

નારાયણપંડિતાચાર્યવિરચિતે શ્રીમધ્વવિજયે
આનંદાંકિતે દ્વિતીયઃ સર્ગઃ ॥

www.yousigma.com